## ધ્યાનમ્

નમામિ નારાયણપાદપંકજં
કરોમિ નારાયણપૂજનં સદા ।
વદામિ નારાયણનામ નિર્મલં
સ્મરામિ નારાયણતત્ત્વમવ્યયમ ॥ ૧ ॥

જલે વિષ્ણુઃ સ્થલે વિષ્ણુર્વિષ્ણુઃ પર્વતમસ્તકે ।
જ્વાલામાલાકુલે વિષ્ણુર્વિષ્ણુઃ સર્વતોમુખે ॥ ૨ ॥

કરારવિંદેન પદારવિંદં મુખારવિંદે વિનિવેશયન્તમ્ ।
વટસ્ય પત્રસ્ય પુટે શયાનં બાલં મુકુંદં મનસા સ્મરામિ ॥ ૩ ॥

# શ્રી વિષ્ણુસહસ્ત્રનામસ્તોત્ર

### પૂર્વ ભાગ

ૐ શુક્લાંબરધરં વિષ્ણું શશિવર્ણં ચતુર્ભુજમ્ ।
પ્રસન્નવદનં ધ્યાયેત્ સર્વવિઘ્નોપશાન્તયે ॥ ૧ ॥

વ્યાસં વસિષ્ઠનપ્તારં શક્તેઃ પૌત્રમકલ્મષમ્ ।
પરાશરાત્મજં વન્દે શુકતાતં તપોનિધિમ્ ॥ ૨ ॥

વ્યાસાય વિષ્ણુરૂપાય વ્યાસરૂપાય વિષ્ણવે ।
નમૌ વૈ બ્રહ્મનિધયે વાસિષ્ઠાય નમો નમઃ ॥ ૩ ॥

અવિકારાય શુદ્ધાય નિત્યાય પરમાત્મને ।
સદૈકરૂપરૂપાય વિષ્ણવે સર્વજિષ્ણવે ॥ ૪ ॥

યસ્ય સ્મરણમાત્રેણ જન્મસંસારબન્ધનાત્ ।
વિમુચ્યતે નમસ્તસ્મૈ વિષ્ણવે પ્રભવિષ્ણવે ॥ ૫ ॥

॥ ૐ નમો વિષ્ણવે પ્રભવિષ્ણવે ॥

## શ્રી વૈશમ્પાયન ઉવાચ

શ્રુત્વા ધર્માનશેષેણ પાવનાનિ ચ સર્વશઃ ।
યુધિષ્ઠિરઃ શાન્તનવં પુનરેવાભ્યભાષત ॥ ૬ ॥

## યુધિષ્ઠિર ઉવાચ

કિમેકં દૈવતં લોકે કિં વાપ્યેકં પરાયણમ્ ।
સ્તુવન્તઃ કં કમર્ચન્તઃ પ્રાપ્નુયુર્માનવાઃ શુભમ્ ॥ ૭ ॥

કો ધર્મઃ સર્વધર્માણાં ભવતઃ પરમો મતઃ ।
કિં જપન્ મુચ્યતે જન્તુર્જન્મસંસારબન્ધનાત્ ॥ ૮ ॥

## શ્રી ભીષ્મ ઉવાચ

જગત્પ્રભું દેવદેવમ્ અનન્તં પુરુષોત્તમમ્ ।
સ્તુવન્નામસહસ્રેણ પુરુષઃ સતતોત્થિતઃ ॥ ૯ ॥

તમેવ ચાર્ચયન્નિત્યં ભક્ત્યા પુરુષમવ્યયમ્ ।
ધ્યાયન્સ્તુવન્નમસ્યંશ્ચ યજમાનસ્તમેવ ચ ॥ ૧૦ ॥

અનાદિનિધનં વિષ્ણું સર્વલોકમહેશ્વરમ્ ।
લોકાધ્યક્ષં સ્તુવન્નિત્યં સર્વદુઃખાતિગો ભવેત્ ॥ ૧૧ ॥

બ્રહ્મણ્યમં સર્વધર્મજ્ઞં લોકાનાં કીર્તિવર્ધનમ્ ।
લોકનાથં મહદ્ભૂતં સર્વભૂતભવોદ્ભવમ્ ॥ ૧૨ ॥

એષ મે સર્વધર્માણાં ધર્મોઽધિકતમોઃ મતઃ ।
યદ્ભક્ત્યા પુણ્ડરીકાક્ષં સ્તવૈરર્ચેન્નરઃ સદા ॥ ૧૩ ॥

પરમં યો મહત્તેજઃ પરમં યો મહત્તપઃ ।
પરમં યો મહદ્બ્રહ્મ પરમં યઃ પરાયણમ્ ॥ ૧૪ ॥

પવિત્રાણાં પવિત્રં યો મંગલાનાં ચ મંગલમ્ ।
દૈવતં દેવતાનાં ચ ભૂતાનાં યોઽવ્યયઃ પિતા ॥ ૧૫ ॥

યતઃ સર્વાણિ ભૂતાનિ ભવન્ત્યાદિયુગાગમે ।
યસ્મિંશ્ચ પ્રલયં યાન્તિ પુનરેવ યુગક્ષયે ॥ ૧૬ ॥

તસ્ય લોકપ્રધાનસ્ય જગન્નાથસ્ય ભૂપતે ।
વિષ્ણોર્નામસહસ્રં મે શ્રૃણુ પાપભયાપહમ્ ॥ ૧૭ ॥

યાનિ નામાનિ ગૌણાનિ વિખ્યાતાનિ મહાત્મનઃ ।
ઋષિભિઃ પરિગીતાનિ તાનિ વક્ષ્યામિ ભૂતયે ॥ ૧૮ ॥

ઋષિર્નામ્નાં સહસ્રસ્ય વેદવ્યાસો મહામુનિઃ ।
છન્દોઽનુષ્ટુપ્ તથા દેવો ભગવાન્ દેવકીસુતઃ ॥ ૧૯ ॥

અમૃતાંશૂદ્ભવો બીજં શક્તિર્દેવકીનન્દનઃ ।
ત્રિસામા હૃદયં તસ્ય શાન્ત્યર્થે વિનિયુજ્યતે ॥ ૨૦ ॥

વિષ્ણું જિષ્ણું મહાવિષ્ણું પ્રભવિષ્ણું મહેશ્વરમ્ ।
અનેકરૂપદૈત્યાન્તં નમામિ પુરુષોત્તમમ્ ॥ ૨૧ ॥

## પૂર્વ ન્યાસ

અસ્ય શ્રીવિષ્ણોર્દિવ્યસહસ્રનામસ્તોત્રમહામન્ત્રસ્ય । શ્રી વેદવ્યાસો ભગવાન્ ઋષિઃ । અનુષ્ટુપ્ છન્દઃ । શ્રીમહાવિષ્ણુઃ પરમાત્મા શ્રીમન્નારાયણો દેવતા । અમૃતાંશૂદ્ભવો ભાનુરિતિ બીજમ્ । દેવકીનન્દનઃ સ્રષ્ટેતિ શક્તિઃ । ઉદ્ભવઃ ક્ષોભણો દેવ ઇતિ પરમો મન્ત્રઃ । શંખભૃન્નન્દકી ચક્રીતિ કીલકમ્ । શાર્ઙ્ગધન્વા ગદાધર ઇત્યસ્ત્રમ્ । રથાંગપાણિરક્ષોભ્ય ઇતિ નેત્રમ્ । ત્રિસામા સામગઃ સામેતિ કવચમ્ । આનન્દં પરબ્રહ્મેતિ યોનિઃ । ઋતુસ્સુદર્શનઃ કાલ ઇતિ દિગ્બન્ધઃ । શ્રીવિશ્વરૂપ ઇતિ ધ્યાનમ્ । શ્રીમહાવિષ્ણુપ્રીત્યર્થે સહસ્રનામ જપે વિનિયોગઃ ॥

## ધ્યાનમ્

ક્ષીરોદન્વત્પ્રદેશે શુચિમણિવિલસત્સૈકતે મૌક્તિકાનાં
માલાક્લૃપ્તાસનસ્થઃ સ્ફટિકમણિનિભૈર્ મૌક્તિકૈર્મણ્ડિતાંગઃ ।

શુભ્રૈરભ્રૈરદભ્રૈરુપરિવિરચિતૈર્ મુક્ત પીયૂષવર્ષૈર
આનન્દી નઃ પુનીયાદરિનલિનગદાશંખપાણિર્મુકુન્દઃ ॥ ૧ ॥

ભૂઃ પાદૌ યસ્ય નાભિર્ વિયદસુરનિલશ્ચન્દ્રસૂર્યૌ ચ નેત્રે
કર્ણાવાશાઃ શિરોદ્યૌર્ મુખમપિ દહનો યસ્ય વાસ્તેયમબ્ધિઃ ।

અન્તસ્થં યસ્ય વિશ્વં સુરનરખગગોભોગિગન્ધર્વદૈત્યૈઃ
ચિત્રં રંરમ્યતે તં ત્રિભુવનવપુષં વિષ્ણુમીશં નમામિ ॥ ૨ ॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

શાન્તાકારં ભુજગશયનં પદમનાભં સુરેશં
વિશ્વાધારં ગગનસદૃશં મેઘવર્ણં શુભાંગમ્ ।
લક્ષ્મીકાન્તં કમલનયનં યોગિભિર્ધ્યાનગન્યં
વન્દે વિષ્ણુ ભવભયહરં સર્વલોકૈકનાથમ્ ॥ ૩ ॥

મેઘશ્યામં પીતકૌશેયવાસં શ્રીવત્સાંકં કૌસ્તુભોદ્ભાસિતાંગમ્ ।
પુણ્યોપેતં પુણ્ડરીકાયતાક્ષં વિષ્ણું વંદે સર્વલોકૈકનાથમ્ ॥ ૪ ॥

નમઃ સમસ્તભૂતાનામ્ આદિભૂતાય ભૂભૃતે ।
અનેકરૂપરૂપાય વિષ્ણવે પ્રભવિષ્ણવે ॥ ૫ ॥

સશંખચક્રં સકિરીટકુણ્ડલં સપીતવસ્ત્રં સરસીરુહક્ષણમ્ ! ।
સહારવક્ષસ્થલશોભિકૌસ્તુભં નમામિ વિષ્ણું શિરસા ચતુર્ભુજમ્ ॥ ૬ ॥

છાયાયાં પારિજાતસ્ય હેમસિંહાસનોપરિ ।
આસીનમમ્બુદશ્યામમ્ આયતાક્ષમલંકૃતમ્ ॥ ૭ ॥

ચન્દ્રાનનં ચતુબાહું શ્રીવત્સાંકિતવક્ષસમ્ ।
રુક્મિણીસત્યભામાભ્યાં સહિતં કૃષ્ણમાશ્રયે ॥ ૮ ॥

# । સ્તોત્રમ્ ।
## હરિઃ ૐ

ૐ વિશ્ર્વં વિષ્ણુર્વષટ્કારો ભૂતભવ્યભવત્પ્રભુઃ ।
ભૂતકૃદ્ભૂંતભૃદ્ભાવો ભૂતાત્મા ભૂતભાવનઃ ।। ૧ ।।

પૂતાત્મા પરમાત્મા ચ મુકતાનાં પરમા ગતિઃ ।
અવ્યયઃ પુરુષઃ સાક્ષી ક્ષેત્રજ્ઞોઽક્ષર એવ ચ ।। ૨ ।।

યોગો યોગવિદાં નેતા પ્રધાનપુરુષેશ્ર્વરઃ ।
નારસિંહવપુઃ શ્રીમાન્ કેશવઃ પુરુષોત્તમઃ ।। ૩ ।।

સર્વઃ શર્વઃ શિવઃ સ્થાણુર્ભૂતાદિર્નિધિરવ્યયઃ ।
સંભવો ભાવનો ભર્તા પ્રભવઃ પ્રભુરીશ્ર્વરઃ ।। ૪ ।।

સ્વયંભૂઃ શંભુરાદિત્યઃ પુષ્કરાક્ષો મહાસ્વનઃ ।
અનાદિનિધનો ધાતા વિધાતા ધાતુરુત્તમઃ ।। ૫ ।।

અપ્રમેયો હૃષીકેશઃ પદમનાભોઽમરપ્રભુઃ ।
વિશ્ર્વકર્મા મનુસ્તષ્ટા સ્થવિષ્ઠઃ સ્થવિરો ધ્રુવઃ ।। ૬ ।।

અગ્રાહ્યઃ શાશ્ર્વતઃ કૃષ્ણો લોહિતાક્ષઃ પ્રતર્દનઃ ।
પ્રભૂતસ્ત્રિકકુબ્ધામ પવિત્રં મંગલં પરમ્ ।। ૭ ।।

ઈશાનઃ પ્રાણદઃ પ્રાણો જ્યેષ્ઠઃ શ્રેષ્ઠઃ પ્રજાપતિઃ ।
હિરણ્યગર્ભો ભૂગર્ભો માધવો મધુસૂદનઃ ।। ૮ ।।

ઈશ્ર્વરો વિક્રમી ધન્વી મેધાવી વિક્રમઃ ક્રમઃ ।
અનુત્તમો દુરાધર્ષઃ કૃતજ્ઞઃ કૃતિરાત્મવાન્ ।। ૯ ।।

સુરેશઃ શરણં શર્મ વિશ્ર્વરેતાઃ પ્રજાભવઃ ।
અહઃ સંવત્સરો વ્યાલઃ પ્રત્યયઃ સર્વદર્શનઃ ।। ૧૦ ।।

અજઃ સર્વેશ્ર્વરઃ સિદ્ધઃ સિદ્ધિઃ સર્વાદિરચ્યુતઃ ।
વૃષાકપિરમેયાત્મા સર્વ યોગવિનિઃ સૃતઃ ।। ૧૧ ।।

વસુર્વસુમનાઃ સત્યઃ સમાત્માऽસંમિતઃ સમઃ ।
અમોઘઃ પુંડરીકાક્ષો વૃષકર્મા વૃષાકૃતિઃ ॥ ૧૨ ॥

રુદ્રો ગહુશિરા બભ્રુર્વિશ્વયોનિઃ શુચિશ્રવાઃ ।
અમૃતઃ શાશ્વતઃ સ્થાણુર્વરારોહો મહાતપાઃ ॥ ૧૩ ॥

સર્વગઃ સર્વવિદ્ભાનુર્વિષ્વક્સેનો જનાર્દનઃ ।
વેદો વેદવિદવ્યંગો વેદાંગો વેદવિત્કવિઃ ॥ ૧૪ ॥

લોકાધ્યક્ષઃ સુરાધ્યક્ષો ધર્માધ્યક્ષઃ કૃતાકૃતઃ ।
ચતુરાત્મા ચતુર્વ્યૂહશ્ચતુર્દંષ્ટ્રશ્ચતુર્ભુજઃ ॥ ૧૫ ॥

ભ્રાજિષ્ણુર્ભોજનં ભોક્તા સહિષ્ણુર્જગદાદિજઃ ।
અનઘો વિજયો જેતા વિશ્વયોનિઃ પુનર્વસુઃ ॥ ૧૬ ॥

ઉપેન્દ્રો વામનઃ પ્રાંશુર્ અમોઘઃ શુચિરૂર્જિતઃ ।
અતીંદ્રઃ સંગ્રહઃ સર્ગો ધૃતાત્મા નિયમો યમઃ ॥ ૧૭ ॥

વેદ્યો વૈદ્યઃ સદાયોગી વીરહા માધવો મધુઃ ।
અતીંદ્રિયો મહામાયો મહોત્સાહો મહાબલઃ ॥ ૧૮ ॥

મહાબુદ્ધિર્મહાવીર્યો મહાશક્તિર્મહાદ્યુતિઃ ।
અનિર્દેશ્યવપુઃ શ્રીમાન્ અમેયાત્મા મહાદ્રિધૃક્ ॥ ૧૯ ॥

મહેષ્વાસો મહીભર્તા શ્રીનિવાસઃ સતાં ગતિઃ ।
અનિરુદ્ધઃ સુરાનંદો ગોવિંદો ગોવિદાં પતિઃ ॥ ૨૦ ॥

મરીચિર્દમનો હંસઃ સુપર્ણો ભુજગોત્તમઃ ।
હિરણ્યનાભઃ સુતપાઃ પદમનાભઃ પ્રજાપતિઃ ॥ ૨૧ ॥

અમૃત્યુઃ સર્વદૃક્ સિંહઃ સંધાતાઃ સંધિમાન્ સ્થિરઃ ।
અજો દુર્મર્ષણઃ શાસ્તા વિશ્રુતાત્મા સુરારિહા ॥ ૨૨ ॥

ગુરુર્ગુરુતમો ધામ સત્યઃ સત્યપરાક્રમઃ ।
નિમિષોऽનિમિષઃ સ્ત્રગ્વી વાચસ્પતિરુદારધીઃ ॥ ૨૩ ॥

અગ્રણીર્ગ્રામણીઃ શ્રીમાન્ ન્યાયો નેતા સમીરણઃ ।
સહસ્ત્રમૂર્ધા વિશ્વાત્મા સહસ્ત્રાક્ષઃ સહસ્ત્રપાત્ ।। ૨૪ ।।

આવર્તનો નિવૃત્તાત્મા સંવૃતઃ સંપ્રમર્દનઃ ।
અહઃ સંવર્તકો વહ્નિર અનિલો ધરણીધરઃ ।। ૨૫ ।।

સુપ્રસાદઃ પ્રસન્નાત્મા વિશ્વધૃગ્વિશ્વભુગ્વિભુઃ ।
સત્કર્તા સત્કૃતઃ સાધુર્જહ્નુર્નારાયણો નરઃ ।। ૨૬ ।।

અસંખ્યેયોઽપ્રમેયાત્મા વિશિષ્ટઃ શિષ્ટકૃચ્છુચિઃ ।
સિદ્ધાર્થઃ સિદ્ધસંકલ્પઃ સિદ્ધિદઃ સિદ્ધિસાધનઃ ।। ૨૭ ।।

વૃષાહી વૃષભો વિષ્ણુર્વૃષપર્વા વૃષોદરઃ ।
વર્ધનો વર્ધમાનશ્ચ વિવિક્તઃ શ્રુતિસાગરઃ ।। ૨૮ ।।

સુભુજો દુર્ધરો વાગ્મી મહેંદ્રો વસુદો વસુઃ ।
નૈકરુપો બૃહદ્રૂપઃ શિપિવિષ્ટઃ પ્રકાશનઃ ।। ૨૯ ।।

ઓજસ્તેજોદ્યુતિધરઃ પ્રકાશાત્મા પ્રતાપનઃ ।
ઋદ્ધઃ સ્પષ્ટાક્ષરો મંત્રશ્ચંદ્રાંશુર્ભાસ્કરદ્યુતિઃ ।। ૩૦ ।।

અમૃતાંશૂદ્ભવો ભાનુઃ શશબિંદુઃ સુરેશ્વરઃ ।
ઔષધં જગતઃ સેતુઃ સત્યધર્મપરાક્રમઃ ।। ૩૧ ।।

ભૂતભવ્યભવન્નાથઃ પવનઃ પાવનોઽનલઃ ।
કામહા કામકૃત્ કાંતઃ કામઃ કામપ્રદઃ પ્રભુઃ ।। ૩૨ ।।

યુગાદિકૃદ્ યુગાવર્તો નૈકમાયો મહાશનઃ ।
અર્દશ્યોઽવ્યક્ત રુપશ્ચ સહસ્ત્રજિદનન્તજિત્ ।। ૩૩ ।।

ઇષ્ટોઽવિશિષ્ટઃ શિષ્ટેટઃ શિખંડી નહુષો વૃષઃ ।
ક્રોધહા ક્રોધકૃત્કર્તા વિશ્વબાહુર્મહીધરઃ ।। ૩૪ ।।

અચ્યુતઃ પ્રથિતઃ પ્રાણઃ પ્રાણદો વાસવાનુજઃ ।
અપાંનિધિરધિષ્ઠાનમ્ અપ્રમત્તઃ પ્રતિષ્ઠિતઃ ।। ૩૫ ।।

સ્કંદઃ સ્કંદધરો ધુર્યો વરદો વાયુવાહનઃ ।
વાસુદેવો બૃહદ્ભાનુર્ આદિદેવઃ પુરંદરઃ ।। ૩૬ ।।

અશોકસ્તારણસ્તારઃ શૂરઃ શૌરિર્જનેશ્વરઃ ।
અનુકૂલઃ શતાવર્તઃ પદમી પદમનિભેક્ષણઃ ।। ૩૭ ।।

પદમનાભોઽરવિંદાક્ષઃ પદમગર્ભઃ શરીરભૃત્ ।
મહર્દ્ધિર્ઋદ્ધો વૃદ્ધાત્મા મહાક્ષો ગરુડધ્વજઃ ।। ૩૮ ।।

અતુલઃ શરભોઃ ભીમઃ સમયજ્ઞો હવિર્હરિઃ ।
સર્વલક્ષણલક્ષણ્યો લક્ષ્મીવાન્ સમિતિંજયઃ ।। ૩૯ ।।

વિક્ષારો રોહિતો માર્ગો હેતુર્દામોદરઃ સહઃ ।
મહીધરો મહાભાગો વેગવાનમિતાશનઃ ।। ૪૦ ।।

ઉદ્ભવઃ ક્ષોભણો દેવઃ શ્રીગર્ભઃ પરમેશ્વરઃ ।
કરણં કારણં કર્તા વિકર્તા ગહનો ગુહઃ ।। ૪૧ ।।

વ્યવાસો વ્યવસ્થાનઃ સંસ્થાનઃ સ્થાનદો ધ્રુવઃ ।
પરર્દ્ધિઃ પરમસ્પષ્ટસ્તુષ્ટઃ પુષ્ટઃ શુભેક્ષણઃ ।। ૪૨ ।।

રામો વિરામો વિરજો માર્ગો નેયો નયોઽનયઃ ।
વીરઃ શક્તિમતાં શ્રેષ્ઠો ધર્મો ધર્મવિદુત્તમઃ ।। ૪૩ ।।

વૈકુંઠઃ પુરુષઃ પ્રાણઃ પ્રાણદઃ પ્રણવઃ પૃથુઃ ।
હિરણ્યગર્ભઃ શત્રુઘ્નો વ્યાપ્તો વાયુરધોક્ષજઃ ।। ૪૪ ।।

ઋતુઃ સુદર્શનઃ કાલઃ પરમેષ્ઠી પરિગ્રહઃ ।
ઉગ્રઃ સંવત્સરો દક્ષો વિશ્રામો વિશ્ર્વદક્ષિણઃ ।। ૪૫ ।।

વિસ્તારઃ સ્થાવરસ્થાણુઃ પ્રમાણં બીજમવ્યયમ્ ।
અર્થોઽનર્થો મહાકોશો મહાભોગો મહાધનઃ ।। ૪૬ ।।

અનિર્વિણ્ણઃ સ્થવિષ્ઠોઽભૂર્ધર્મયૂપો મહામખઃ ।
નક્ષત્રનેમિર્નક્ષત્રી ક્ષમઃ ક્ષામઃ સમીહનઃ ।। ૪૭ ।।

યજ્ઞ ઇજ્યો મહેજ્યશ્ચ ક્રતુઃ સત્રં સતાં ગતિઃ ।
સર્વદર્શી વિમુક્તાત્મા સર્વજ્ઞો જ્ઞાનમુત્તમમ્ ।। ૪૮ ।।

સુવ્રતઃ સુમુખઃ સૂક્ષ્મઃ સુઘોષઃ સુખદઃ સુહૃત્ ।
મનોહરો જિતક્રોધો વીરબાહુર્વિદારણઃ ।। ૪૯ ।।

સ્વાપનઃ સ્વવશો વ્યાપી નૈકાત્મા નૈકકર્મકૃત્ ।
વત્સરો વત્સલો વત્સી રત્નગર્ભો ધનેશ્વરઃ ।। ૫૦ ।।

ધર્મગુબ્ધર્મકૃદ્ધર્મી સદ્સંત્ક્ષારમક્ષરમ્ ।
અવિજ્ઞાતા સહસ્ત્રાંશુર્વિધાતા કુતલક્ષણઃ ।। ૫૧ ।।

ગભસ્તિનેમિઃ સત્વસ્થઃ સિંહો ભૂતમહેશ્વરઃ ।
આદિદેવો મહાદેવો દેવેશો દેવભૃદ્ગુરુઃ ।। ૫૨ ।।

ઉત્તરો ગોપતિર્ગોપ્તા જ્ઞાનગમ્યઃ પુરાતનઃ ।
શરીર ભૂતભૃદ્ભોક્તા કપીંદ્રો ભૂરિ દક્ષિણઃ ।। ૫૩ ।।

સોમપોઽમૃતપઃ સોમળ પુરુજિત્પુરુસત્તમઃ ।
વિનયો જયઃ સત્યસંધો દાશાર્હઃ સાત્વતાંપતિઃ ।। ૫૪ ।।

જીવો વિનયિતા સક્ષી મુકુંદોઽમિતવિક્રમઃ ।
અમ્ભોનિધિરનન્તાત્મા મહોદધિશયોઽન્તકઃ ।। ૫૫ ।।

અજો મહાર્હઃ સ્વાભાવ્યો જિતામિત્રઃ પ્રમોદનઃ ।
આનંદો નંદનો નંદઃ સત્યધર્મા ત્રિવિક્રમઃ ।। ૫૬ ।।

મહર્ષિઃ કપિલાચાર્યઃ કૃતજ્ઞો મેદિનીપતિઃ ।
ત્રિપદસ્ત્રિદશાધ્યક્ષો મહાશૃંગઃ કૃતાંતકૃત્ ।। ૫૭ ।।

મહાવરાહો ગોવિંદઃ સુષેણઃ કનકાંગદી ।
ગુહ્યો ગભીરો ગહનો ગુપ્તશ્ચક્રગદાધરઃ ।। ૫૮ ।।

વેધાઃ સ્વાંગોઽજિતઃ કૃષ્ણો દૃઢઃ સંકર્ષણોઽચ્યુતઃ ।
વરુણો વારુણો વૃક્ષઃ પુષ્કરાક્ષો મહામનાઃ ।। ૫૯ ।।

ભગવાન્ ભગહાનંદી વનમાલી હલાયુધઃ ।
આદિત્યો જ્યોતિરાદિત્યઃ સહિષ્ણુર્ગતિસત્તમઃ ॥ ૬૦ ॥

સુધન્વા ખંડપરશુર્દારુણો દ્રવિણપ્રદઃ ।
દિવિસ્પૃક્સર્વદગ્વ્યાસો વાચસ્પતિરયોનિજઃ ॥ ૬૧ ॥

ત્રિસામા સામગઃ સામ નિર્વાણં ભેષજં ભિષક્ ।
સંન્યાસકૃચ્છમઃ શાંતો નિષ્ઠા શાંતિઃ પરાયણમ્ ॥ ૬૨ ॥

શુભાંગઃ શાંતિદઃ સ્રષ્ટા કુમુદઃ કુવલેશયઃ ।
ગોહિતો ગોપતિર્ગોપ્તા વૃષભાક્ષો વૃષપ્રિયઃ ॥ ૬૩ ॥

અનિવર્તી નિવૃત્તાત્મા સંક્ષેપ્તા ક્ષેમકૃચ્છિવઃ ।
શ્રીવત્સવક્ષાઃ શ્રીવાસઃ શ્રીપતિઃ શ્રીમતાંવરઃ ॥ ૬૪ ॥

શ્રીદઃ શ્રીશઃ શ્રીનિવાસઃ શ્રીનિધિઃ શ્રીવિભાવનઃ ।
શ્રીધરઃ શ્રીકરઃ શ્રેયઃ શ્રીમાંલ્લોકત્રયાશ્રયઃ ॥ ૬૫ ॥

સ્વક્ષઃ સ્વંગઃ શતાાનંદો નંદિર્જ્યોતિર્ગણેશ્વરઃ ।
વિજિતાત્માઽવિધેયાત્મા સત્કીર્તિશ્છિન્નસંશયઃ ॥ ૬૬ ॥

ઉદીર્ણઃ સર્વતશ્ચક્ષુર્ અનીશઃ શાશ્વતસ્થિરઃ ।
ભૂશયો ભૂષણો ભૂતિર્વિશોકઃ શોકનાશનઃ ॥ ૬૭ ॥

અર્ચિષ્માનર્ચિતઃ કુંભો વિશુદ્ધાત્મા વિશોધનઃ ।
અનિરુદ્ધોઽપ્રતિરથઃ પ્રદ્યુમ્નોઽમિતવિક્રમઃ ॥ ૬૮ ॥

કાલનેમિનિહા વીરઃ શૌરિઃ શૂરજનેશ્વરઃ ।
ત્રિલોકાત્મા ત્રિલોકેશઃ કેશવઃ કેશિહા હરિઃ ॥ ૬૯ ॥

કામદેવઃ કામપાલઃ કામી કાંતઃ કૃતાગમઃ ।
અનિર્દેશ્યવપુર્વિષ્ણુર્વીરોઽનન્તો ધનંજયઃ ॥ ૭૦ ॥

બ્રહ્મણ્યો બ્રહ્મકૃદ્બ્રહ્મા બ્રહ્મ બ્રહ્મવિવર્ધનઃ ।
બ્રહ્મવિદ્ બ્રાહ્મણો બ્રહ્મી બ્રહ્મજ્ઞો બ્રાહ્મણપ્રિયઃ ॥ ૭૧ ॥

મહાક્રમો મહાકર્મા મહાતેજા મહોરગઃ ।
મહાક્રતુર્મહાયજ્વા મહાયજ્ઞો મહાહવિઃ ॥ ૭૨ ॥

સ્તવ્યઃ સ્તવપ્રિયઃ સ્તોત્રં સ્તુતિઃ સ્તોતારણપ્રિયઃ ।
પૂર્ણઃ પૂરયિતા પુણ્યઃ પુણ્યકીર્તિરનામયઃ ॥ ૭૩ ॥

મનોજવસ્તીર્થકરો વસુરેતા વસુપ્રદઃ ।
વસુપ્રદો વાસુદેવો વસુર્વસુમના હવિઃ ॥ ૭૪ ॥

સદ્ગતિઃ સત્કૃતિઃ સત્તા સદ્ભૂતિઃ સત્પરાયણઃ ।
શૂરસેનો યદુશ્રેષ્ઠઃ સન્નિવાસઃ સુયામુનઃ ॥ ૭૫ ॥

ભૂતાવાસો વાસુદેવઃ સર્વાસુનિલયોઽનલઃ ।
દર્પહા દર્પદો દૃપ્તો દુર્ધરોઽથા પરાજિતઃ ॥ ૭૬ ॥

વિશ્ર્વમૂર્તિર્મહામૂર્તિર્દીપ્તમૂર્તિરમૂર્તિમાન્ ।
અનેકમૂર્તિરવ્યક્તઃ શતમૂર્તિઃ શતાનનઃ ॥ ૭૭॥

એકો નૈકઃ સવ કઃ કિં યત્તત્પદમનુત્તમમ્ ।
લોકબન્ધુર્લોકનાથો માધવો ભક્તવત્સલઃ ॥ ૭૮ ॥

સુવર્ણવર્ણો હેમાંગો વરાંગશ્ર્ચંદનાંગદી ।
વીરહા વિષમઃ શૂન્યો ઘૃતાશીરચલશ્ર્ચલઃ ॥ ૭૯ ॥

અમાની માનદો માન્યો લોકસ્વામી ત્રિલોકધૃક્ ।
સુમેધા મેધજો ધન્યઃ સત્યમેધા ધરાધરઃ ॥ ૮૦ ॥

તેજોવૃષો દ્યુતિધરઃ સર્વશસ્ત્રભૃતાંવરઃ ।
પ્રગહો નિગ્રહો વ્યગ્રો નૈકશૃંગો ગદાગ્રજઃ ॥ ૮૧ ॥

ચતુર્મૂર્તિશ્ર્ચતુર્બાહુશ્ર્ચતુર્વ્યૂહશ્ર્ચતુર્ગતિઃ ।
ચતુરાત્મા ચતુર્ભાવશ્ર્ચતુર્વેદવિદેકપાત્ ॥ ૮૨ ॥

સમાવર્તોઽનિવૃત્તાત્મા દુર્જયો દુરતિક્રમઃ ।
દુર્લભો દુર્ગમો દુર્ગો દુરાવાસો દુરારિહા ॥ ૮૩ ॥

શુભાંગો લોકસારંગઃ સુતંતુસ્તંતુવર્ધનઃ ।
ઇંદ્રકર્મા મહાકર્મા કૃતકર્મા કૃતાગમઃ ॥ ૮૪ ॥

ઉદ્દભવઃ સુંદરઃ સુંદો રત્નનાભઃ સુલોચનઃ ।
અર્કો વાજસનઃ શૃંગી જયંતઃ સર્વવિજજયી ॥ ૮૫ ॥

સુવર્ણબિંદુરક્ષોભ્યઃ સર્વવાગીશ્વરેશ્વરઃ ।
મહાહ્રદો મહાગર્તો મહાભૂતો મહાનિધિઃ ॥ ૮૬ ॥

કુમુદઃ કુંદરઃ કુંદઃ પર્જન્યઃ પાવનોઽનિલઃ ।
અમૃતાંશોઽમૃતવપુઃ સર્વજ્ઞઃ સર્વતોમુખઃ ॥ ૮૭ ॥

સુલભઃ સુવ્રતઃ સિદ્ધઃ શત્રુજિચ્છત્રુતાપનઃ ।
ન્યગ્રોધોદુંબરોઽશ્વત્થશ્વાણૂ રાંધ્રનિષૂદનઃ ॥ ૮૮ ॥

સહસ્ત્રાર્ચિઃ સપ્તજિહ્વઃ સપ્તૈધાઃ સપ્તવાહનઃ ।
અમૂર્તિરનઘોઽચિન્ત્યો ભયકૃદ્ ભયનાશનઃ ॥ ૮૯ ॥

અણુર્બૃહત્કૃશઃ સ્થૂલો ગુણભૃન્નિર્ગુણો મહાન્ ।
અધૃતઃ સ્વધૃતઃ સ્વાસ્યઃ પ્રાગ્વંશો વંશવર્દ્ધનઃ ॥ ૯૦ ॥

ભારભૃત્ કથિતો યોગી યોગીશઃ સર્વકામદઃ ।
આશ્રમઃ શ્રમણઃ ક્ષામઃ સુપુર્ણોવાયુવાહનઃ ॥ ૯૧ ॥

ધનુર્ધરો ધનુર્વેદો દંડો દમયિતા દમઃ ।
અપરાજિતઃ સર્વસહો નિયંતા નિયમોઽયમઃ ॥ ૯૨ ॥

સત્ત્વાન્ સાત્ત્વિકઃ સત્યઃ સત્યધર્મપરાયણઃ ।
અભિપ્રાયઃ પ્રિયાર્હોઽર્હઃ પ્રિયકૃત્ પ્રીતિવર્ધનઃ ॥ ૯૩ ॥

વિહાયસગતિર્જ્યોતિઃ સુરુચિર્હુતભુગ્વિભુઃ ।
રવિર્વિરોચનઃ સૂર્ય સવિતા રવિલોચનઃ ॥ ૯૪ ॥

અનંતો હુતભુગ્ભોક્તા સુખદો નૈકજોઽગ્રજઃ ।
અનિર્વિણ્ણઃ સદામર્ષી લોકાધિષ્ટાનમદ્ભુતઃ ॥ ૯૫ ॥

સનાત્સનાતનતમઃ કપિલઃ કપિરવ્યયઃ ।
સ્વસ્તિદઃ સ્વસ્તિકૃત્સ્વસ્તિ સ્વસ્તિભુક્ સ્વસ્તિદક્ષિણઃ ॥ ૯૬ ॥

અરૌદ્રઃ કુંડલી ચક્રી વિક્રમ્યૂર્જિતશાસનઃ ।
શબ્દાતિગઃ શબ્દસહઃ શિશિરઃ શર્વરીકરઃ ॥ ૯૭ ॥

અક્રૂરઃ પેશલો દક્ષો દક્ષિણઃ ક્ષમિણાંવરઃ ।
વિદ્વત્તમો વીતભયઃ પુણ્યશ્રવણકીર્તનઃ ॥ ૯૮ ॥

ઉત્તારણો દુષ્કૃતિહા પુણ્યો દુસ્વપ્નનાશનઃ ।
વીરહા રક્ષણઃ સંતો જીવનઃ પર્યવસ્થિતઃ ॥ ૯૯ ॥

અનંતરૂપોડનંતશ્રીર્જિતમન્યુર્ભયાપહઃ ।
ચતુરસ્ત્રો ગભીરાત્મા વિદિશો વ્યાદિશો દિશઃ ॥ ૧૦૦ ॥

અનાદિર્ભૂર્ભુવો લક્ષ્મીઃ સુવીરો રુચિરાંગદઃ ।
જનનો જનજન્માદિર્ભીમો ભીમપરાક્રમઃ ॥ ૧૦૧ ॥

આધારનિલયોડધાતા પુષ્પહાસઃ પ્રજાગરઃ ।
ઊર્ધ્વગઃ સત્પથાચારઃ પ્રાણદઃ પ્રણવઃ પણઃ ॥ ૧૦૨ ॥

પ્રમાણં પ્રાણનિલયઃ પ્રાણભૃત પ્રાણજીવનઃ ।
તત્ત્વં તત્વવિદેકાત્મા જન્મમૃત્યુજરાતિગઃ ॥ ૧૦૩ ॥

ભૂર્ભુવઃસ્વસ્તરુસ્તારઃ સવિતા પ્રપિતામહઃ ।
યજ્ઞો યજ્ઞપતિર્યજ્વા યજ્ઞાંગો યજ્ઞવાહનઃ ॥ ૧૦૪ ॥

યજ્ઞભૃદ યજ્ઞકૃદ યજ્ઞી યજ્ઞભુગ્યજ્ઞસાધનઃ ।
યજ્ઞાંતકૃદ યજ્ઞગૃહ્યમ્ અન્નમન્નાદ એવ ચ ॥ ૧૦૫ ॥

આત્મયોનિઃ સ્વયંજાતો વૈખાનઃ સામગાયનઃ ।
દેવકીનંદનઃ સ્ત્રષ્ટા ક્ષિતીશઃ પાપનાશનઃ ॥ ૧૦૬ ॥

શંખભૃન્નંદકી ચક્રી શાર્ઙ્ગધન્વા ગદાધરઃ ।
રથાંગપાણિરક્ષોભ્યઃ સર્વપ્રહરણાયુધઃ ॥ ૧૦૭ ॥
સર્વપ્રહરણાયુધ ૐ નમ ઇતિ

વનમાલી ગદી શાઙ્ર્ગી શંખી ચક્રી ચ નન્દકી ।
શ્રીમાન્નારાયણો વિષ્ણુર્વાસુદેવોઽભિરક્ષતુ ॥ ૧૦૮ ॥

શ્રી વાસુદેવોઽભિરક્ષતુ ૐ નમ ઇતિ

## ફલશ્રુતિ

ઇતીદં કીર્તનીયસ્ય કેશવસ્ય મહાત્મનઃ ।
નામ્નાં સહસ્ત્રં દિવ્યાનામશેષેણ પ્રકીર્તિતમ્ ॥ ૧ ॥

ય ઇદં શૃણુયાન્નિત્યં યશ્ચાપિ પરિકીર્તયેત્ ।
નાશુભં પ્રાપ્નુયાત્ કિંચિત્ સોઽમુત્રેહ ચ માનવઃ ॥ ૨ ॥

વેદાન્તગો બ્રાહ્મણઃ સ્યાત્ ક્ષત્રિયો વિજયી ભવેત્ ।
વૈશ્યો ધનસમૃદ્ધઃ સયાચ્છૂદ્રઃ સુખમવાપ્નુયાત્ ॥ ૩ ॥

ધર્માર્થીપ્રાપ્નુયાદ્ધર્મમ્ અર્થાથી ચાર્થમાપ્નુયાત્ ।
કામાનવાપ્નુયાત્ કામી પ્રજાર્થીચાપ્નુયાત્ પ્રજામ્ ॥ ૪ ॥

ભક્તિમાન્ યઃ સદોત્થાય શુચિસ્તદ્ગતમાનસઃ ।
સહસ્ત્રં વાસુદેવસ્ય નામ્નામેતત્ પ્રકીર્તયેત્ ॥ ૫ ॥

યશઃ પ્રાપ્નોતિ વિપુલં જ્ઞાતિપ્રાધાન્યમેવ ચ ।
અચલાં શ્રિયમાપ્નોતિ શ્રૈયઃ પ્રાપ્નોત્યનુત્તમમ્ ॥ ૬ ॥

ન ભયં ક્વચિદાપ્નોતિ વીર્યં તેજશ્ચ વિન્દતિ ।
ભવત્યરોગો દ્યુતિમાન્ બલરૂપગુણાન્વિતઃ ॥ ૭ ॥

રોગાર્તો મુચ્યતે રોગાદ્ બદ્ધો મુચ્યતે બન્ધનાત્ ।
ભયાન્ મુચ્યેત ભીતસ્તુ મુચ્યેતાપન્ન આપદઃ ॥ ૮ ॥

દુર્ગાણ્યતિતરત્યાશુ પુરુષોત્તમમ્ ।
સ્તુવન્ નામસહસ્ત્રેણ નિત્યં ભક્તિસમીન્વતઃ ॥ ૯ ॥

વાસુદેવાશ્રયો મર્ત્યો વાસુદેવપરાયણઃ ।
સર્વપાપવિશુદ્ધાત્મા યાતિ બ્રહ્મ સનાતનમ્ ॥ ૧૦ ॥

ન વાસુદેવભક્તાનામશુભં વિદ્યતે ક્વચિત્ ।
જન્મમૃત્યજરાવ્યાધિભયં નૈવોપજાયતે ॥ ૧૧ ॥

ઇમં સ્તવમધીયાનઃ શ્રદ્ધાભક્તિસમન્વિતઃ ।
યુજ્યેતાત્મસુખક્ષાન્તિશ્રીધૃતિસ્મૃતિકીર્તિભિઃ ॥ ૧૨ ॥

ન ક્રોધો ન ચ માત્સર્યં ન લોભો નાશુભા મતિઃ ।
ભવન્તિ કૃતપુણ્યાનાં ભક્તાનાં પુરુષોત્તમે ॥ ૧૩ ॥

દ્યૌઃ સચન્દ્રાર્કનક્ષત્રાં ખં દિશો ભૂર્મહોદધિઃ ।
વાસુદેવસ્ય વીર્યેણ વિધૃતાનિ મહાત્મનઃ ॥ ૧૪ ॥

સસુરાસુરગન્ધર્વં સયક્ષોરગરાક્ષસમ્ ।
જગદ્વશે વર્તતેદં કૃષ્ણસ્ય સચરાચરમ્ ॥ ૧૫ ॥

ઇંદ્રિયાણિ મનો બુદ્ધિઃ સત્ત્વં તેજો બલં ધૃતિઃ ।
વાસુદેવાત્મકાન્યાહુઃ ક્ષેત્રં ક્ષેત્રજ્ઞ એવ ચ ॥ ૧૬ ॥

સર્વાગમાનામાચારઃ પ્રથમં પરિકલ્પતે ।
આચરપ્રભવો ધર્મો ધર્મસ્ય પ્રભુરચ્યુતઃ ॥ ૧૭ ॥

ઋષયઃ પિતરો દેવા મહાભૂતાનિ ધાતવઃ ।
જંગમાજંગમં ચેદં જગન્નારાયણોદ્ભવમ્ ॥ ૧૮ ॥

યોગો જ્ઞાનં તથા સાંખ્યં વિદ્યાઃ શિલ્પાદિ કર્મ ચ ।
વેદાઃ શાસ્ત્રાણિ વિજ્ઞાનમેતત્સર્વં જનાર્દનાત્ ॥ ૧૯ ॥

એકો વિષ્ણુર્મહદ્ભૂતં પૃથગ્ ભૂતાન્યનેકશઃ ।
ત્રીંલ્લોકાન્ વ્યાપ્ય ભૂતાત્મા ભુંક્તે વિશ્વભુગવ્યયઃ ॥ ૨૦ ॥

ઇમં સ્તવં ભગવતો વિષ્ણોર્વ્યાસેન કીર્તિતમ્ ।
પઠેદ્ય ઇચ્છેત્પુરુષઃ શ્રેયઃ પ્રાપ્તું સુખાનિ ચ ॥ ૨૧ ॥

વિશ્વેશ્વરમજં દેવં જગતઃ પ્રભુમવ્યયમ્ ।
ભજન્તિ યે પુષ્કરાક્ષં ન તે યાન્તિ પરાભવમ્ ॥ ૨૨ ॥

॥ ન તે યાન્તિ પરાભવં ૐ નમ ઇતિ ॥

## વિશેષ ફલશ્રુતિ

### અર્જુન ઉવાચ

પદમપત્રવિશાલાક્ષ પદમનાભ સુરોત્તમ ।
ભક્તાનામનુરક્તાનાં ત્રાતા ભવ જનાર્દન ॥ ૧ ॥

### શ્રી ભગવાનુવાચ

યો માં નામસહસ્ત્રોણ સ્તોતુમિચ્છતિ પાંડવ ।
સોડહમેકેન શ્લોકેન સ્તુત એવ ન સંશયઃ ॥ ૨ ॥
॥ સ્તુત એવ ન સંશયઃ ૐ નમ ઇતિ ॥

### વ્યાસ ઉવાચ

વાસનાદ્વાસુદેવસ્ય વાસિતં ભુવનત્રયમ્ ।
સર્વભૂતનિવાસોડસિ વાસુદેવ નમોડસ્તુ તે ॥ ૩ ॥
॥ વાસુદેવ નમોડસ્તુ ત ૐ નમ ઇતિ ॥

### પાર્વત્યુવાચ

કેનોપાયેન લઘુના વિષ્ણોર્નામસહસ્ત્રકમ્ ।
પઠયતે પણ્ડિતૈર્નિત્યં શ્રોતુમિચ્છામ્યહં પ્રભો ॥ ૪ ॥

### ઇશ્વર ઉવાચ

શ્રી રામ રામેતિ રમે રામે મનોરમે ।
સહસ્ત્રનામ તત્તુલ્યં રામનામ વરાનને ॥ ૫ ॥

।। શ્રી રામનામ વરાનને ॐ નમ ઇતિ ।।

બ્રહ્મોવાચ

નમોઽસ્ત્વનન્તાય સહસ્ત્રમૂર્તયે
સહસ્ત્રપાદાક્ષિશિરોબાહુવે ।
સહસ્ત્રનામ્ને પુરુષાય શાશ્વતે
સહસ્ત્રકોટિયુગધારિણે નમઃ ।। ૬ ।।

।। સહસ્ત્રકોટિયુગધારિણે નમઃ ॐ નમ ઇતિ ।।

સંજય ઉવાચ

યત્ર યોગેશ્ર્વરઃ કૃષ્ણો યત્રા પાર્થો ધનુર્ધરઃ ।
તત્ર શ્રી ર્વિજયો ભૂતિર્ધ્રુવા નીતિર્મતિર્મમ ।। ૭ ।।

શ્રીભગવાનુવાચ

અનન્યાશ્ચિન્તયન્તો માં યે જનાઃ પર્યપાસતે ।
તેષાં નિત્યાભિયુક્તાનાં યોગક્ષેમં વહાન્યહમ્ ।। ૮ ।।

પરિત્રાણાય સાધૂનાં વિનાશાય ચ દુષ્કૃતામ્ ।
ધર્મસંસ્થાપનાર્થાય સંભવામિ યુગે યુગે ।। ૯ ।।

શુભકામના

આર્તા વિષણ્ણાઃ શિથિલાશ્ર્વ ભીતાઃ
ઘોરેષુ ચ વ્યાધિષુ વર્તમાનાઃ ।
સંકીર્ત્ય નારાયણ શબ્દમાત્રં
વિમુક્તદુઃખાઃ સુખિનો ભવન્તે ।। ૧૦ ।।

## ક્ષમાપન

યદક્ષરપદભ્રષ્ટં માત્રાહીનં ચ યદ્ભવેત્ ।
તત્સર્વં ક્ષમ્યતાં દેવ નારાયણ નમોઽસ્તુતે ॥ ૧૧ ॥

કાયેન વાચા મનસેન્દ્રિયૈર્વા
બુદ્ધ્યાત્મના વા પ્રકૃતેઃ સ્વભાવાત્ ।
કરોમિ યદ્યત્ સકલં પરસ્મૈ
નારાયણાયેતિ સમર્પયામિ ॥ ૧૨ ॥

ઇતિ શ્રીમહાભારતે શતસાહસ્ત્ર્યાં સંહિતાયાં વૈયાસિક્યામ અનુશાસનિકે પર્વણિ
ભીષ્મયુધિષ્ઠર સંવાદે શ્રીવિષ્ણોર્સહસ્ત્રનામસ્તોત્રં સંપૂર્ણમ્ ॥